# 7.1.10 QNM SUPPORTING DOCUMENTS

## List of Programmes

| Year | Name of Programme | Date and duration of the initiative |
|---|---|---|
| 2015-16 | Sanskrit Week Celebration | 26-08-2015 TO 01-09-2015 |
| 2015-16 | Bhoomi Pujan of Shri Krishna Temple | 23-11-2015 |
| 2015-16 | Natural Disaster Prevention Measure Program | 19-02-2016 |
| 2016-17 | Sanskrit Week Celebration | 13-08-2016 TO 19-08-2016 |
| 2017-18 | Sanskrit Week Celebration | 01-08-2017 TO 08-08-2017 |
| 2017-18 | Indian Coast Guard Introduction Program | 18-01-2018 |
| 2017-18 | Tree Plantation | 08-04-2018 |
| 2018-19 | Sanskrit Week Celebration | 20-08-2018 TO 27-08-2018 |
| 2018-19 | 2nd Dwadas Jyotirlinga Ceremony | 23-02-2019 TO 25-02-2019 |
| 2019-20 | District Level Tree Plantation Forest Festival | 04-08-2019 |
| 2019-20 | Sanskrit Day Celebration on Aditya Birla Public School | 07-08-2019 |
| 2019-20 | Sanskrit Week Celebration | 08/08/2019 to 14/08/2019 |
| 2019-20 | Navratri Celebration | 04/10/2019 to 05/10/2019 |

# Sanskrit Week Celebration

# (26-08-2015 to 01-09-2015)

Sanskrit Week was celebrated in Shree Somnath Sanskrit University from 26th August to 1st September 2015. In this programme, 255 students from Schools and Colleges of Veraval participated in various Competitions, organized by the University. Prof. Hrishikesh Jha, Head of Sanskrit Department, L.N. Mithila University was the Chief Guest of inaugural session. The whole programme was presided over by the Hon'ble Vice-Chancellor, Prof. Ark Nath Chaudhary

## श्रीसोमनाथसंस्कृतविश्वविद्यालये समायोजितः संस्कृतसप्ताहोत्सवः

प्रतिवर्षमिव अस्मिन् वर्षेऽपि २६.८.२०१५ तः १.९.२०१५ पर्यन्तं श्रीसोमनाथसंस्कृतविश्वविद्यालये संस्कृतसप्ताहोत्सवः सोत्साहम् आचरितः। उत्सवस्यास्य अङ्गतया विश्वविद्यालये नैकासां स्पर्धानाम् आयोजनं कृतमासीत्। आसु स्पर्धासु वेरावलतालुकाक्षेत्रे विद्यमानेषु माध्यमिक-उच्चमाध्यमिक-विद्यालयेषु महाविद्यालयेषु च पठन्तः २५५ छात्राः भागम् अवहन्। उत्सवस्यास्य उद्घाटने एल्. एन्. मिथिलाविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचराः प्राच्यपाश्चात्यविद्यानिपुणाः महान्तो वैयाकरणा दार्शनिकाश्च प्रोफेसर हृषीकेश-झा-महाभागाः समुपस्थाय छात्रान् प्रेरितवन्तः। तैः समं रमौली, नवादा इत्यत्र विद्यमानस्य राष्ट्रियसंस्कृतसंस्थानस्य आदर्शसंस्कृतमहाविद्यालयस्य प्राचार्याः डॉ कामेश्वरचौधरी महाभागाः अपि उद्घाटनकार्यक्रमे अतिथित्वेन संप्राप्ताः। तैः अपि स्वीये उद्बोधने संस्कृतभाषायाः, संस्कृताध्ययनस्य च महत्त्वं ज्ञापितम्। सप्ताहेऽस्मिन् प्रवृत्तानां स्पर्धानां सङ्क्षिप्तं वृत्तम् इत्थम् -

| क्रमः | स्पर्धा | भागग्राहिणः | | | | आहत्य |
|---|---|---|---|---|---|---|
| | | माध्यमिक-विद्यालयेभ्यः | उच्चमाध्यमिक-विद्यालयेभ्यः | महाविद्यालयेभ्यः | विश्वविद्यालयीयाः | |
| १ | वक्तृत्वस्पर्धा | ७ | १ | ० | १५ | २३ |
| २ | कथाकथनस्पर्धा | ५ | १ | ० | ७ | १३ |
| ३ | रङ्गवल्लीस्पर्धा | ११ | ९ | ६ | ९ | ३५ |
| ४ | निबन्धलेखनस्पर्धा | ८ | २ | ० | १२ | २२ |
| ५ | श्लोकगानस्पर्धा | ११ | ६ | १ | २४ | ४२ |
| ६ | समूहगानस्पर्धा | ४८ | १९ | ० | २४ | ९१ |
| ७ | विज्ञापनस्पर्धा | ० | ० | ० | १५ | १५ |
| ८ | रसप्रश्नाः | ० | ० | ० | १४ | १४ |
| | आहत्य | ९० | ३८ | ७ | १२० | २५५ |

उत्सवस्यास्य समारोपकार्यक्रमः १.९.२०१५ दिनाङ्के सम्पन्नः। कार्यक्रमेऽस्मिन् वेरावलनगरस्य वरिष्ठः अधिवक्ता श्रीमान् किशोर कोटक विशिष्टातिथित्वेन समुपस्थाय संस्कृतभाषायाः, विविध-स्पर्धासु भागग्रहणस्य च महत्त्वम् अबोधयत्। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रोफेसर अर्कनाथ चौधरी महाभागाः अपि कार्यक्रमे समुपस्थाय संस्कृतानुरागिणः समबोधयन्। संस्कृतभाषायाः व्यापकाय प्रचाराय ईदृश-स्पर्धानां महत्त्वं व्यज्ञापयन्। तेन सममेव संस्कृतप्रचारकार्ये प्रौद्योगिकी-उपयोगस्य सम्भावनाः अपि अचर्चयन्। आगामिषु वर्षेषु इतोऽपि महता वैभवेन संस्कृतसप्ताहोत्सवः आचरितः भवेत् इति तदीयं संकल्पमपि ते प्राकटयन्।

Report Source: **SOMJYOTI**- University Newsletter (Issue: 12, Page no. 03)

# Bhoomi Pujan of Shri Krishna Temple (23-11-2015)

Bhoomi Pujan Programme of Shri Krishna Temple was organized on 23rd November 2015 by Shri Somnath Trust. In this auspicious occasion, the students of Shree Somnath Sanskrit University chanted the sacred verses of Shrimad Bhagawat Gita in the guidance of Dr. Pankaj Kumar Rawal sir.

**॥ गोलोकधाम-श्रीकृष्णाचरणपादुकामन्दिरस्य भूमिपूजनप्रसङ्गः ॥**

श्रीसोमनाथट्रस्टद्वारा कार्तिकपूर्णिमायाः महोत्सवः प्रसङ्गः प्रतिवर्षं समनुष्ठीयते । वर्षेऽस्मिन् श्रीसोमनाथविन्यासस्याद्भुतसङ्कल्पः आसीद् यत् भगवता श्रीकृष्णेन यस्मात् स्थानात् स्वधामगमनलीला विहिता तस्मिन् स्थाने त्रिलोकधाममन्दिरनिर्माणस्य भगीरथकार्यं भूमिपूजनेन तस्य श्रीगणेशं भवेत् तदर्थं विन्यासेनानेन त्रिदिवसात्मकमायोजनं ''कृष्णं वन्दे जगद्गुरुम्'' इति शीर्षकेण करणीयमासीत् । अवसरेऽस्मिन् श्रीसोमनाथविन्यासेन २३/११/२०१५ तमे दिनाङ्के कार्तिकत्रयोदश्यां सोमवासरे प्रभासतीर्थसोमनाथसन्निधौ भगवतः श्रीकृष्णचन्द्रस्य महाप्रयाणप्रस्थाने श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य च्छात्रैः डॉ.पङ्कजकुमार एस्. रावलमहोदयानां मार्गदर्शने श्रीमद्भगवद्गीतायाः मूलपारायणमुच्चस्वरेण तत्स्थानैव विहितम् । हरिहरयोः कृपाप्रसादेन अनुकम्पया अनुग्रहणेन च परमभागवतस्य महाप्रयाणप्रस्थाने त्रिलोकधाममन्दिरस्य भूमिपूजावसरे श्रीसोमनाथविन्यासेन सह श्रीसोमनाथसंस्कृतविश्वविद्यालयस्यापि परस्परानुरागेण हरिहरयोर्मेलनप्रसङ्गमिव आत्मविद्यारूपायाः गीतायाः उच्चस्वरेण सामूहिकपाठेन वातावरणं दिव्यं मङ्गलमाध्यात्मिकञ्च जातम् । पाठान्ते प्रसादं गृहीत्वा धन्यतामनुभूय भगवतचरणयोकार्तज्ञं विनिवेद्य च्छात्रप्राध्यापकाः स्वस्वभवनमगच्छन् ।

Report Source: **SOMJYOTI**- University Newsletter (Issue: 12, Page no. 15)

# Appreciation Letter by Shri Somnath Trust

**SHREE SOMNATH TRUST**

Registration No. A-103 (Gir Somnath)
Donation Exempted Under Sec. 80 (G) (5) of I.T. Act.

Ref. No. :

Ref : SST/ADM/900 /2020 — Dated: 28-12-2020

To,
The Registrar
Shree Somnath Sanskrit University,
Veraval

## Appreciation letter

With the Blessing of the Lord Somnath, We herewith very gratified to the Scholarly faculties and students of Shree Somnath Sanskrit University, Veraval for their extended cooperation to make a grand success of the Khat Muhurt ceremony of the **"Golokdham-Krishna Swadham Prayan Bhoomi Temple"** organized by the Somnath Trust. We always get support from your university in such programs. Every time, Shree Somnath Sanskrit Univerity provides help and Cooperation in various programmes organized by the Somnath Trust. For this gesture Somnath Trust thankful to Shri Somnath Sanskrit University.

- General Manager

OFFICE OF THE GENERAL MANAGER, SHREE SOMNATH PILGRIM FACILITY & INFORMATION CENTRE, PRABHAS PATAN, SOMNATH
Pin : 362 268. Dist. : Gir Somnath (Gujarat) Tele : (02876) 232694 E-mail : sompp@somnath.org Web Site : www.somnath.org

# Natural Disaster Prevention Measure Program (19-02-2016)

It was the locational advantage of Shree Somnath Sanskrit University that on February 19, the 6th National Disaster Response Force of Gandhinagar came in the University campus and demonstrated various measures to solve the Disasters. All the students, academic and non-academic staff of the University benefitted greatly from this program.

**प्राकृतिक-आपत्तिनिवारणोपायविषयकः कार्यक्रमः**

१९/०२/२०१६ तमे दिनाङ्के शुक्रवासरे श्रीसोमनाथ-संस्कृतविश्वविद्यालये गान्धिनगरस्थषष्ठसैन्यदलस्यापत्ति-सैन्यद्वारा (6th National Disaster Response Force) आपत्तिनिवारणाय विविधोपायानां प्रदर्शनम् अभवत्।

Report Source: **SOMJYOTI**- University Newsletter (Issue: 13, Page no. 08)

# Sanskrit Week Celebration
# (13-08-2016 to 19-08-16)

Sanskrit Week Celebration was organized from 13th to 19th August 2016 in the University Campus. In this program, students participated in many activities like essay writing , story telling, singing etc. Prof. Vasant Kumar Bhat, Director of Sanskrit Department, Gujarat University presented a lecture in the closing ceremony.



## संस्कृतसप्ताहोत्सवः शास्त्रीयव्यख्यानमाला च


मञ्चे विराजमानाः महानुभावाः


संस्कृतसप्ताहोत्सवस्य उद्घाटनकार्यक्रमः


कार्यक्रमस्य श्रोतागणः

श्री सोमनाथसंस्कृतविश्वविद्यालयः १३/०८/२०१६ दिनाङ्कतः १९/०८/२०१६ दिनाङ्कं यावत् संस्कृतसप्ताहोत्सवेन साकं शास्त्रीयव्याख्यानमालाकार्यक्रमं समायोजितवान् । विश्वविद्यालयपरिसरे समायोजितेऽस्मिन् कार्यक्रमे विशिष्टानि शास्त्रीयव्याख्यानानि विविधाः स्पर्धाश्चायोजिताः ।

- १३/०८/२०१६ तमे दिनाङ्के सरस्वतीवन्दनया सह दीपप्रज्वालनपूर्वकं कार्यक्रमस्योद्घाटनसमारोहः मान्यानां महानुभावानां प्रो.पङ्कजचांदेमहोदयानां, प्रो. अभिराजराजेन्द्रमिश्रमहोदयानां, डॉ. गौतमपटेलमहोदयानां च समुपस्थितौ, प्रो. अर्कनाथचौधरीमहाभागानाम् अध्यक्षतायां सम्पन्नः। तत्र प्रो. पङ्कजचांदेमहोदयाः नाट्यशास्त्रानुसारं नाट्यकलाविकासस्योपरि महनीयं शास्त्रीयव्याख्यानम् अकुर्वन् । प्रो. अभिराजराजेन्द्रमिश्रमहोदयानां गीर्वाणगिरा आधुनिकसाहित्यशास्त्रविषयकं विशिष्टव्याख्यानमाकर्ण्य उपकृताः सर्वे। एवञ्च डॉ. गौतमपटेलमहाभागानां सारस्वतप्रवचनेनालङ्कृताः वयम् । सत्रद्वये कृतेऽस्मिन् उद्घाटनसमन्विते शास्त्रीयव्याख्यानमालाकार्यक्रमे डॉ. ललितपटेलः, डॉ.जानकीशरणः आचार्यः च मञ्चसञ्चालनम् अकुरुताम् ।
- १४/८/२०१६ तमे दिनाङ्के गुजरातविश्वविद्यालयस्य संस्कृतविभागनिदेशकचराः प्रो. वसन्तकुमारभट्टमहोदयाः ''पाणिनीयव्याकरणे अर्थः विवक्षा च'' इत्यस्मिन् विषये अश्रुतपूर्वं शास्त्रीयं व्याख्यानम् अकुर्वन् । अस्य सत्रस्य मञ्चसञ्चालनं डॉ. दीपेश-कतिरामहोदयः अकरोत् । दिवसेऽस्मिन् तिस्रः स्पर्धाः जाताः निबन्धलेखनस्पर्धा, कथाकथनस्पर्धा, समूहगानस्पर्धा च । तासां विवरणम् -

| | |
|---|---|
| कथाकथनस्पर्धा - | १ - मयूरः जानी |
| | २ - जयेशः शियाणी |
| | ३ - अरुणः पाण्डेयः |
| निबन्धलेखनस्पर्धा - | १ - अरुणः पाण्डेयः, आकाशः पुरोहितः च |
| | २ - मयूरः जानी, जयदेवः च |
| | ३ - जयेशःशियाणी, कचोट धरमः च |
| समूहगानस्पर्धा - | १ - आकाशः, मयूरः, जयः, राकेशः, हार्दिकः, अजयः |
| | २. अनुपमातिवारीवृन्दः |
| | ३ - राहुलझावृन्दः |

Library University




संस्कृतसप्ताहोत्सवस्य उद्घाटनकार्यक्रमे छात्रैः प्रस्तूयमानाः सांस्कृतिककार्यक्रमाः

Report Source: **SOMJYOTI**- University Newsletter (Issue: 14, Page no. 13)

# Sanskrit Week Celebration
# (01-08-2017 to 08-08-2017)

Sanskrit Week Festival was organized in the University Campus from 1st to 8th August on the day of Sawan Purnima. Various competitions were organized in Shool and College level. Many students from shools and colleges of Veraval participated in competitions like Essay writing, singing, story telling, speech, stotra kanth path, rangoli, etc. Prof. Chandrakant Shukla, Dr. Meena Shukla and Dr. Dinesh Chandra Negandhi delivered lectures. The Hon,ble Vice-Chancellor of the University presided over the programme.



018 Year : 2017-18

संस्कृतसप्ताहोत्सवः – २०१७

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन माननीयकुलपतिमहोदयस्य निर्देशानुसारम् ऑगस्टमासस्य प्रथमदिनाङ्कात् अष्टमदिनाङ्कं यावत् विश्वविद्यालयपरिसरे संस्कृतसप्तहोत्सवः आयोजितः। अस्मिन् कार्यक्रमे विश्वविद्यालये भाषण–निबन्धलेखन–समूहगान–स्तोत्र–कण्ठपाठ–रङ्गावली–स्फूर्तिस्पर्धा–साहित्यरचनाद्याः बह्व्यः स्पर्धाः आयोजिताः, यत्र विद्यालयस्तर–विश्वविद्यालयस्तरच्छात्रैः भागः गृहीतः। अस्मिन् संस्कृत–सप्ताहोत्सवे विभिन्नविषयेषु नैकेषां विदुषां भाषणानि आपि समजायन्त । यथा

१. प्रो. चन्द्रकान्त शुक्लः
२. डॉ. मीना शुक्लः
३. डॉ. दिनेशचन्द्र नेगांधी

अस्य संस्कृतसप्ताहोत्सवस्य समापनसमारोहः ०८/०८/२०१८ तमे दिनाङ्के अभवत् यत्र संस्कृतसप्ताहोत्सवस्य समग्रं संयोजनं डो.जानकीशरण आचार्यः डॉ. दिपेश कतिरा च अकुरुताम्।

Report Source: **SOMJYOTI**- University Newsletter (Issue: 16, Page no. 01)

# Indian Coast Guard Introduction Program(18/01/2018)

Being on the shores of the sea, it's the locational advantage of Shree Somnath Sanskrit University to come in contact with the Indian Coast Guards constantly. On 18th January 2018, 25 students of University performed the Introduction Program along with the Indian Coast Guard. The students gained Knowledge about how the Coast Guards protect the Country's coast and how to solve the problem of Fishermen.

## भारतीयतटरक्षकस्य परिचयकार्यक्रमः

१८-०१-२०१८ इत्यस्य परिचयकार्यक्रमः समायोजितः आसीत्। तस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पञ्चविंशतिछात्रैः भागः गृहीतः। कार्यक्रमेऽस्मिन् तटरक्षकाः कथं देशस्य तटरक्षणं कुर्वन्ति, धीवरादीनां च समस्यानां कथं समाधानमादधातीति विषयेषु सरलतया छात्राः बोधिताः। छात्राणां गणप्रमुखत्वेन डॉ. जयेशमुंगरा महोदयः उत्तरदायित्वं प्रावहत्।




Report Source: **SOMJYOTI**- University Newsletter (Issue: 16, Page no. 10)




C-149

# Tree Plantation (08-04-2018)

Tree Plantation Program was organized in the University Campus on 8th April 2018under the joint aegis of Indian Rayon Factory, Veraval to keep the University Campus clean and green and also to protect the campus from being affected of any type of pollution.





# Sanskrit Week Celebration
# (20-08-18 to 27-08-18)

Sanskrit Week was celebrated in Shree Somnath Sanskrit University from 20th to 27st August 2018. In this programme, 200 students from many Schools and Colleges of Veraval participated in various Competitions like Shlok Chanting, rangoli, problem solving competition, essay writing, story telling etc., organized by the University. Shri Vijay Singh Chavda, Manager of Somnath Trust attended this programmeas the Chief Guest. The whole programme was presided over by the Hon’ble Vice-Chancellor of the University.



## श्रीसोमनाथसंस्कृतविश्वविद्यालये संस्कृतसप्ताहोत्सवः

श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रतिवर्षमिव अस्मिन्नपि वर्षे २०.०८.२०१८ दिनाङ्कतः २७.०८.२०१८ दिनाङ्कं यावत् संस्कृतसप्ताहोत्सवः समायोजितः। सप्ताहोत्सवेऽस्मिन् बह्व्यः स्पर्धाः कार्यक्रमाश्च समायोजिताः विश्वविद्यालयेन। इमाः स्पर्धाः कार्यक्रमाश्च ज्ञानभाण्डागारस्य संस्कृतभाषायाः प्रसारे प्रचारे च अवश्यमेव उपयोगिनो भविष्यन्ति।



संस्कृतसप्ताहोत्सवस्य सम्पूर्तिसमारोहस्य किञ्चन दृश्यम्

२०.०८.२०१८ दिनाङ्के संस्कृतसप्ताहोत्सवस्य उद्घाटनकार्यक्रमः विश्वविद्यालयस्य सभागारे सम्पन्नः। कार्यक्रमे मुख्यवक्तृरूपेण लालभाईदलपतभाईभारतीयसंस्कृतिविद्यामन्दिरस्य निदेशकः प्रो. जितेन्द्रशाहवर्यः समुपस्थितिं विधाय संस्कृतस्य महत्त्वविषये छात्रान् उद्बोधितवान्। स न्यगादीत् यत् संस्कृतभाषा सदाचारं बोधयन्ती सन्मार्गं प्रदर्शयन्ती सती जीवनलक्ष्यं प्रापयति। एतस्मिन्नवसरे वेरावल-पाटणसंयुक्त-नगरपालिकायाः अध्यक्षा श्रीमती मञ्जुलाबेन वी. सुयाणीमहोदया अपि उपस्थिता आसीत्। संस्कृतसप्ताहोत्सवेऽस्मिन् वेरावलतालुकाक्षेत्रस्थ-विभिन्नेभ्यः विद्यालयेभ्यः महाविद्यालयेभ्यश्च समागताः आहत्य २०० छात्राः विभिन्नासु स्पर्धासु भागमगृह्णन्। विश्वविद्यालयेन अस्मिन् सप्ताहोत्सवे विद्यालय-महाविद्यालयस्तरे रङ्गवल्ली, श्लोकगानम्, वक्तृत्वस्पर्धा, स्फूर्तिस्पर्धा, निबन्धलेखम्, कथाकथनम्, समूहगानम्, समस्यापूर्तिस्पर्धा च समायोजिताः आसन्। यत्र छात्राः विभिन्नविषयेषु निबन्धलेखन-भाषणादिकं व्यधासिषुः।

२७.०८.२०१८ दिनाङ्के संस्कृतसप्ताहोत्सवस्य समापनकार्यक्रमे प्रो. महेन्द्रकुमारदवे, प्रो. देवेन्द्रनाथपाण्डेयः, डॉ. नरेन्द्रकुमार पण्ड्या, श्रीसोमनाथन्यासस्य प्रबन्धकः श्रीविजयसिंहचावडा च समुपस्थिताः आसन्। विशिष्टातिथिरूपेण उद्बोधनं विदधानः श्रीविजयसिंहचावडा अकथयत् यत् संस्कृतभाषा राष्ट्रभावं प्रेरयति। तदनु मञ्चस्थाः महानुभावाः संस्कृतसप्ताहोत्सवे आयोजितासु स्पर्धासु विजेतृभ्यः छात्रेभ्यः पुरस्कारान् व्यतरन्। अस्य कार्यक्रमस्य संयोजनं डॉ. पङ्कजकुमाररावल-शत्रुघ्नपाणिग्राहीमहोदयौ अकुरुताम्। इत्थं गुजरातराज्यस्य एकमेव संस्कृतविश्वविद्यालयेन संस्कृतसप्ताहोत्सवरूपेण संस्कृतभाषाया उत्तरोत्तरं विकासाय प्रचारप्रसाराय छात्राणाम् उत्साहवर्द्धनाय च नैरन्तर्येण संस्कृतसप्ताहोत्सवस्य आयोजनमिदं सुचारुतया क्रियते।

Report Source: **SOMJYOTI**- University Newsletter (Issue: 17-18, Page no. 05)

# 2nd Dwadas Jyotirlinga Ceremony with Shree Somnath Trust, Somnath

## (23-02-2019 to 25-02-2019 )

Shree Somnath Sanskrit University enjoys its major locational advantage of being located near the sacred Somnath Temple. Shri Somnath Trust celebrated the 2ndDwadas Jyotirlinga Ceremony from 23rd to 25thFebruary 2019 in Somnath Temple. On this Ceremony, as the Mass Procession was held from the University Campus to the Somnath Temple, many devotees came on University Campus and became familiar and influenced with the environment of campus.

### द्वितीयः द्वादशज्योतिर्लिङ्गसमारोहः



विश्वविद्यालयपरिसरात् प्रवृत्तायाः शोभायात्रायाः किञ्चन दृश्यम्

द्वितीयद्वादशज्योतिर्लिङ्गसमारोहस्यायोजनं २३.०२.२०१९ तः दिवसत्रयं यावत् श्रीसोमनाथन्यासेन कृतमासीत्। तत्र प्रथमे दिवसे विविधेभ्यः ज्योतिर्लिङ्गेभ्यः समागतानां भक्तानां नागरिकाणां समुपस्थितौ श्रीसोमनाथ-न्यासस्य अध्यक्षवर्याणां श्रीमतां केशुभाई पटेल , श्री पी. के. लहेरी, श्रीविजयसिंह चावडा इत्यादिमहानुभावानां किञ्च, श्रीसोमनाथमन्दिरपरिवार-सदस्यानाम्, स्थानीयनागरिकाणां च उत्साहपूर्णवातावरणे कार्यक्रमोऽयं समारब्धः। प्रथमे दिने शोभायात्रायै सर्वेऽपि आगन्तुकाः श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य परिसरं सम्प्राप्ताः यत्र द्वादशज्योतिर्लिङ्गानां प्रतिकृतयः सिद्धाः कृताः आसन्। तासां सर्वासां ज्योतिर्लिङ्गप्रतिकृतीनां समागतमहानुभावानां करकमलैः पूजनार्चनम् अक्रियत। अन्ते च एतस्मात् परिसरात् भव्यातिभव्यायाः अस्याः शोभायात्रायाः प्रारम्भो जातः, या च शोभायात्रा श्रीसोमनाथमन्दिरं प्रति गता।

Report Source: **SOMJYOTI**- University Newsletter (Issue: 19, Page no. 11)

# Appreciation Letter by Shri Somnath Trust

## SHREE SOMNATH TRUST

Registration No. A-103 (Gir Somnath)
Donation Exempted Under Sec. 80 (G) (5) of I.T. Act.

Ref. No. :

Ref: SST/ADM/ 201 /2020

Dated: 28-12-2020

To,
The Registrar
Shree Somnath Sanskrit University,
Veraval

**Appreciation letter**

With the Blessing of the Lord Somnath, The 2nd Twelfth Jyotirlinga Ceremony-2019 was organized by Somnath Trust from 23-02-2019 to 25-02-2019. The program started with a grand parade from the campus of Shri Somnath Sanskrit University, Veraval. People of Somnath Trust, members of Shri Somnath Sanskrit University along with the students and people of the Veraval town joined in this grand procession. Necessary arrangements have been made by Shri Somnath Sanskrit University in this grand procession. On behalf of Somnath Trust, thanks are extended to Shri Somnath Sanskrit University for its cooperation.

General Manager

OFFICE OF THE GENERAL MANAGER, SHREE SOMNATH PILGRIM FACILITY & INFORMATION CENTRE, PRABHAS PATAN, SOMNATH
Pin : 362 268. Dist. : Gir Somnath (Gujarat) Tele : (02876) 232694 E-mail : sompp@somnath.org Web Site : www.somnath.org




શ્રી મલ્લિકાર્જુન જયોતિર્લિંગ
દ્વિતીય દ્વાદશ જયોતિર્લિંગ સમારોહ
સોમનાથ - ગુજરાત


શ્રી સોમનાથ







# District Level Tree Plantation


# Forest Festival (VAN MAHOTSAV) 04-08-2019

District Level Forest Festival, organized by the Government of Gujarat, was held on Shree Somnath Sanskrit University on 4th August 2019. Plantation programme was also organized under the joint aegis of Shree Somnath Sanskrit University and Forest Department of Gir-Somnath District. Under this programme students of schools performed activies like singing, acting etc. the Collector of Gir-Somnath, Superientendent of Police and many other officers of Gujarat Government attended this programme with great pleasure.

## जनपदस्तरीयः वनमहोत्सवः विश्वविद्यालयपरिसरे समाचरितः

ऑगस्ट मासस्य चतुर्थदिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे गुजरातसर्वकारेण समायोजितः जनपदस्तरीयः वनमहोत्सवः सवैभवं समाचरितः आसीत्। गीरसोमनाथजनपदस्य वनविभागेन किञ्च श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितेऽस्मिन् वनमहोत्सवे मुख्यतया वृक्षारोपणकार्यक्रमः समायोजितः आसीत्, तदङ्गतया विभिन्नविद्यालयच्छात्रैः गीतानि, नाटकानि च प्रस्तुतानि आसन्।

अस्य वनमहोत्सवकार्यक्रमस्य उद्घाटनकार्यक्रमे बीजनिगमस्य अध्यक्षः श्रीराजसीभाई जोटवा, गीरसोमनाथजनपदस्य समाहर्ता श्रीअजयप्रकाशः, पुलिस-अधीक्षकः, स्थानीयः विधायकः श्रीविमलचूडासमा, गुजरातराज्यग्राम्योद्योगनिगमस्य अध्यक्षः श्रीमेघजीभाई-कणझरिया, गीरसोमनाथ-जनपदपञ्चायतप्रमुखा श्रीमती रैयाबेन-जालंधरा, वेरावलपाटनसंयुक्तनगरपालिकाप्रमुखा श्रीमती मञ्जुलाबेनसुयाणी, श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलसचिवः डॉ. दशरथजादवः, वेदविभागाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, अन्ये च अध्यापकाः, छात्राः, वनविभागस्य अधिकारिणः, कर्मचारिणश्च समुपातिष्ठन्। अस्मिन्नवसरे विभिन्नमहानुभावैः एतद्विषयकानि भाषणानि अपि अदीयन्त। वेरावलस्थविभिन्नविद्यालयानां छात्राः वृक्षाणां संरक्षणसंवर्धनविषये गीतमाध्यमेन, नाटकमाध्यमेन च प्रेरणां प्रदत्तवन्तः। कुलसचिवेन डॉ. दशरथजादववर्येण सह इतरैः महानुभावैः विश्वविद्यालयपरिसरे प्रायः २०० वृक्षाणां रोपणं विधाय तेषां वृक्षाणां रक्षणाय प्रतिवचनमपि स्वीकृतम्।





वनमहोत्सवे मञ्चस्थाः महानुभावाः





वृक्षारोपणं कुर्वन् कुलसचिवः डॉ. दशरथजादवः

वृक्षारोपणकार्यक्रमे उपस्थिताः महानुभावाः

वृक्षारोपणस्य किञ्चन दृश्यम्

Report Source: **SOMJYOTI**- University Newsletter (Issue: 20-21, Page no. 23)

# Sanskrit DayCelebration on Aditya Birla Public School, Veraval (07-08-2019)

Sanskrit Day was Celebrated in Aditya Birla Public School on 7th August 2019. In this programme, the Hon,ble Vice-Chancellor of Shree Somnath Sanskrit University, Prof. Gopabandhu Mishra was present as the Chief Guest. The students of Aditya Birla Public School performed many activities like singing, classical dancing etc. and the students of our university also presented Sanskrit Drama on this auspicious occasion.



## आदित्यबिरलापब्लिकविद्यालये समायोजिते संस्कृतदिवसकार्यक्रमे छात्राणां विशेषप्रदर्शनम्

वेरावलनगरस्थेन आदित्यबिरलापब्लिकविद्यालयेन स्वपरिसरे ०७-०८-२०१९ तमे दिनाङ्के संस्कृतदिवसः समायोजितः आसीत् यत्र मुख्यातिथित्वेन श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतेः प्रो. गोपबन्धुमिश्रवर्यस्य उपस्थितिः आसीत्। अस्य संस्कृतदिवसोत्सवकार्यक्रमे आदित्यबिरलापब्लिक-विद्यालयस्य प्राचार्या श्रीमती नीपा रेजी वर्या, संस्कृताध्यापकः श्रीदिनेशशर्मा, विद्यालयस्य इतरे अध्यापकाः, श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य व्याकरण-प्राध्यापकः डॉ. दीपेश कतिरा च उपस्थिताः आसन्। अस्मिन् कार्यक्रमे विद्यालयस्य छात्रैः संस्कृतदिवसं निमित्तीकृत्य संस्कृतगीतानि अगीयन्त, संस्कृतभाषणानि अक्रियन्त, शास्त्रीयनृत्यञ्च अक्रियत। श्रीसोमनाथसंस्कृतविश्वविद्या-लयस्य छात्रौ दवे नीलः, राज्यगुरुः जयदीपश्च अस्मिन्नवसरे विशिष्टमेकं संस्कृतनाटकं प्रस्तुतवन्तौ। संस्कृतगिरा प्रस्तुतम् नाटकमिदम् अत्र उपस्थितेभ्यः सर्वेभ्यः भृशं प्रशंसितम्।

आदित्यबिरलापब्लिकविद्यालयस्य संस्कृतसमारोहे उपस्थितः कुलपतिः प्रो. गोपबन्धुमिश्रः अन्ये च

Report Source: **SOMJYOTI**- University Newsletter (Issue: 20-21, Page no. 19)

# Sanskrit Week Celebration
# (08-08-2019 14-08-2019)

Sanskrit Week Festival was organized in the University Campus from 8th August to 14th August on the day of Sawan Purnima. Various competitions like Essay writing, singing, story telling, speech stotra kanth path etc. were organized in Shool and College level. Many students from shools and colleges of Veraval participated in competitions. The Chief Guest of inauguaral ceremony Prof. Hareram Tripathi, Head of Darshan Department, Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha delivered a lecture. In closing ceremony, the Chief Guest Hon'ble Vice-Chancellor of Bhakt Kavi Narsinh Mehta University, Prof. Chetan Trivedi gave lecture and encouraged students by giving certificates.

अप्रैल-सितम्बर २०१९ 20 सोमज्योतिः (संयुक्ताङ्कः - २०-२१)

## श्रीसोमनाथसंस्कृतविश्वविद्यालये समायोजितः संस्कृतसप्ताहोत्सवः

'संस्कृतसप्ताहोत्सवः' विश्वविद्यालयद्वारा प्रतिवर्षं निर्वर्त्यमानेषु अत्यन्तं प्रमुखेषु कार्यक्रमेषु अन्यतमः। अस्मिन् वर्षे श्रावणपूर्णिमां लक्ष्यीकृत्य ऑगस्टमासस्य अष्टमात् दिनात् चतुर्दशं दिनं यावत् भव्यः संस्कृतसप्ताहोत्सवः समाचरितः। उत्सवस्य अस्य अङ्गतया विशिष्टव्याख्यानम्, संस्कृत-पाला-प्रस्तुतिः, राज्यस्तरीयसङ्गोष्ठी, विद्यालय-महाविद्यालयस्तरीयाणां विविधस्पर्धानाम् आयोजनं च कृतमासीत्। विश्वविद्यालयस्य प्राध्यापकौ डॉ. जानकीशरण आचार्यः, डॉ. दीपेश विनोद कतिरा च समग्रस्य अपि कार्यक्रमस्य संयोजनं कृतवन्तौ।

अस्य 'संस्कृतसप्ताहोत्सवः-२०१९' कार्यक्रमस्य उद्घाटनकार्यक्रमः ०८-०८-२०१९ तमे दिनाङ्के पूर्वाह्णे एकादशवादने विश्वविद्यालयस्य सभागारे समायोजितः आसीत्। विशिष्टस्यास्य संस्कृतोत्सवस्य उद्घाटनकार्यक्रमोऽपि अतिविशिष्टः आसीत्। कार्यक्रमस्यास्य आध्यक्ष्यम् ऊढवन्तः अस्य श्रीसोमनाथ-संस्कृतविश्वविद्यालयस्य कुलपतयः प्रो. गोपबन्धुमिश्रमहाभागाः। अवसरेऽस्मिन् विशिष्टव्याख्यानाय सुदूरात् देहलीनगरात् समागताः लालबहादुर-शास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य दर्शनसङ्कायाध्यक्षाः प्रो. हरेराम त्रिपाठिमहाभागाः स्वीयेन व्याख्यानेन समुपस्थितान् सर्वानपि श्रोतॄन् अनुगृहीतवन्तः। प्रो. त्रिपाठिना साम्प्रतिके काले संस्कृताध्ययनेन न केवलं शिक्षकत्वेन आजीविकायाः अवसरः वर्तते परम् विज्ञान-आभियान्त्रिक-परामर्शसेवादिक्षेत्रेषु अपि संस्कृताध्यापकानां कृते अवसराः समुपलभ्यन्ते।



संस्कृतसप्ताहोत्सवस्य उद्घाटनसत्रे मञ्चस्थाः महानुभावाः

अस्मिन् संस्कृतसप्ताहोत्सवे विविधाः स्पर्धाः द्वयोः स्तरयोः समायोजिताः आसन्। तत्र प्रथमः उच्चमाध्यमिकस्तरः। अस्मिन् स्तरे भागं वोढुं नवमकक्षातः द्वादशकक्षां यावत् पठन्तः छात्राः वेरावल-सोमनाथ-नगरस्य विविधाभ्यः प्रतिष्ठितशालाभ्यः समागताः। द्वितीयः स्तरः महाविद्यालयीयच्छात्राणाम् आसीत्। अस्मिन् स्तरे विश्वविद्यालये शास्त्रि-आचार्यकक्षासु पठन्तः छात्राः भागमवहन्। उभयोः अपि स्तरयोः स्तोत्रकण्ठपाठस्पर्धा, वक्तृत्वस्पर्धा, समूहगानस्पर्धा, निबन्धलेखनस्पर्धा, कथाकथनस्पर्धा, रङ्गवल्लीस्पर्धा च समायोजिता। महाविद्यालयीयच्छात्राणां कृते समस्यापूर्तिस्पर्धा, स्फूर्तिस्पर्धाचापि आयोजिता आसीत्। विश्वविद्यालयस्य प्राध्यापकाः एव आसां स्पर्धानां संयोजनं कृतवन्तः। समेऽपि छात्राः सोत्साहम् आसु स्पर्धासु स्वीयं कौशलं प्रादर्शयन्।



'कीचकवधम्' इति शीर्षकयुतायाः विशिष्टायाः उत्कललोककलायाः प्रदर्शनम्

संस्कृतसप्ताहोतसवस्य अङ्गतया ऑगस्टमासस्य त्रयोदशे दिवसे सायङ्काले वेरावलस्थे सरस्वतीविद्यालयस्य सभागारे संस्कृत-पाला-प्रस्तुतिः समायोजिता आसीत्। 'पाला' इत्येषा उत्कलीया प्रसिद्धा लोककला वर्तते। संस्कृतेन प्रस्तुतायाः 'कीचकवधम्' इति शीर्षकयुतायाः विशिष्टायाः पाला-प्रस्तुतेः कृते सुदूरात् उत्कलराज्यात् गदाधरदाशमहाभागः मिथुनादिसमन्वितेन स्वीयेन नटवृन्देन समं समायातः आसीत्। सुललितसंवादैः, सुभाषितैः, सूक्तिभिः, अभियुक्तोक्तिभिः, गानेन, नृत्येन, अभिनयेन च परिपुष्टा पालाप्रस्तुतिः श्रोतृगणं सुष्ठु समरञ्जयत्।

अस्य संस्कृतसप्ताहोत्सवस्य समापनकार्यक्रमः १४-०८-२०१९ तमे दिनाङ्के अपराह्णे त्रिवादने विश्वविद्यालयस्य सभागारे समायोजितः आसीत्। समापनकार्यक्रमे विश्वविद्यालयस्य कुलपतयः प्रो. गोपबन्धुमिश्रमहोदयाः आध्यक्ष्यमवहन्। मुख्यातिथित्वेन समुपस्थिताः आसन् जूनागढस्थस्य भक्तकविनरसिंहमहेताविश्वविद्यालयस्य कुलपतयः प्रो. चेतन त्रिवेदिमहोदयाः। श्रीमतः त्रिवेदीमहोदयस्य विशिष्टभाषणात् परं महानुभावैः समग्रे संस्कृतसप्ताहे प्रवृत्तासु विविधस्पर्धासु विजयिनां छात्राणां पदकैः प्रमाणपत्रैः स्मृतिचिह्नैः च सम्माननं कृतम्। तदनु प्रो. गोपबन्धुमिश्रमहोदयाः आध्यक्षीयभाषणेन सर्वान् अनुगृहीतवन्तः। सर्वान्ते विश्वविद्यालयस्य कुलसचिवः डॉ. दशरथ जादवमहोदयः कृतज्ञताज्ञापनमकरोत्। इत्थं सम्पन्नः संस्कृतसप्ताहोत्सवः।



संस्कृतसप्ताहोत्सवस्य समापनावसरे मञ्चस्थाः महानुभावाः (वामतः) प्रो. अर्चनादुबे, प्रो. चेतनत्रिवेदी, प्रो. गोपबन्धुमिश्रः, डॉ. दशरथजादवः, डॉ. नरेन्द्रकुमारपण्ड्या च

Report Source: **SOMJYOTI**- University Newsletter (Issue: 20-21, Page no. 20)

# Navratri Celebration
# (04-10-2019 to 05-10-2019)

On 4th and 5th October 2019, Navratri festival was celebrated under the joint aegis of Shree Somnath Sanskrit University and Bharat Vikas Parishad, Veraval. The Hon,ble Vice-Chancellor of Shree Somnath Sanskrit University, Prof. Gopabandhu Mishra, all the academic, non-academic staff members, students, Officers of India Development Council and the residents of Veraval celebrated this festival together with their families by lighting Diyas, worshipped Mother Durga and performed Garba.



## नवरात्रमहोत्सवः सोत्साहं समाचरितः विश्वविद्यालयपरिसरे

श्रीसोमनाथसंस्कृतविश्वविद्यालयः किञ्च भारतविकासपरिषत्-वेरावलम् इत्यनयोः संयुक्तोपक्रमेण विश्वविद्यालयस्य परिसरेऽस्मिन् नवरात्रमहोत्सवस्य आयोजनं ४-५ ऑक्टोबर् २०१९ दिनाङ्कयोः सञ्जातम्। द्वाभ्यां संस्थाभ्यां शताधिकदीपैः देव्याः समाराधना कृता। आरार्तिक्यञ्च कृतम्, ततश्च रासोत्सवः अपि सञ्जातः। अस्मिन् सन्दर्भे विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धु मिश्रः, कुलसचिवः डॉ. दशरथ जादवः, विश्वविद्यालयस्य प्राध्यापकाः, अधिकारिणः, कर्मचारिणः, छात्राः, भारतविकासपरिषदः अधिकारिणः, वेरावलस्य प्रमुखाः नागराः – इते सर्वे सम्भूय देव्याः महाकाल्याः महालक्ष्म्याः महासरस्वत्याश्च समाराधनम् अकार्षुः। नवदिनानामानन्दः द्वाभ्यां दिवसाभ्यां प्राप्तः। सात्त्विकया भावनया भारतीयसनातनसंस्कृतेः पर्व समाचरितम्। अत्र एतदपि वैशिष्ट्यमासीत् यदत्र संस्कृतभाषया अपि रासोत्सवः सञ्जातः आसीत्। विश्वविद्यालयस्य अधिकारिभिः, छात्रैः, भारतविकासपरिषदः सदस्यैः, वेरावलस्थनागरिकैः सम्भूय सात्त्विकभावनया रासोत्सवः कृतः। एतस्य कार्यक्रमस्य संयोजनं डॉ. पङ्कजकुमार रावलः अकरोत्।



महादेव्याः पूजनरतः माननीयः कुलपतिः प्रो. गोपबन्धु मिश्रः, कुलसचिवश्च डॉ. दशरथ जादवः



Report Source: **SOMJYOTI**- University Newsletter (Issue: 22, Page no. 04)

# Appreciation Letter by Bharat Vikas Parishad

સંપર્ક સહયોગ સંસ્કાર સેવા સમર્પણ

ભારત વિકાસ પરિષદ
સોમનાથ શાખા

Bharat Vikas Parishad
SOMNATH BRANCH

President :
KIRIT POPAT
Shanti Tower, 4th Floor
B/h Vikas Colony, Rajendra Bhuvan Road,
Veraval - 362 265.
Ph. (O) 02876 - 243376 (M) : 92282 88300

Secretary :
DHARMESH RAJPARA
C/o. Vrujraj Jewellers,
Tapeshwar Temple Road,
Veraval - 362 265.
Ph. : (O) 02876 - 242233 (M) : 9 408 408 408

Treasurer :
NITESH AMLANI
c/o Darshan Investment55,
Bansidhar Complex,
S.T.Road, VERAVAL-362266
(M) : 93749 44005

Ref:

Dated:10-10-2019

To,
The Registrar
Shree Somnath Sanskrit University,
Veraval

**Appreciation letter**

A Navratri program was organized by Shree Somnath Sanskrit University, Veraval and Bharat Vikas Parishad, Gir Somnath on 04-10-2019 to 05-10-2019. This program was completed very successfully. Shree Somnath Sanskrit University, Veraval was very supportive in making this program a grand success. Therefore, Bharat Vikas Parishad, Somnath branch thankful to Shri Somnath Sanskrit University.

secretary
Bharat Vikas Parishad,
Gir Somnath